॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥

૯. નવમઃ સર્ગઃ

ચોદયંતમથ ગંતુમાદરાત તત્ર ધર્મજમજં પ્રણમ્ય સઃ ।
સૌખ્યતીર્થકવિલોકનાયકો વેદનાયકપુરસ્સરો યયૌ ॥ ૯.૧ ॥

આશ્રમાંતરમવાપ્ય કૃષ્ણતઃ શ્રાવ્યમેષ સકલં ચ શુશ્રુવાન ।
ચિત્તવૃત્તિમનુવૃત્તિમાન ગુરોઃ સાધ્વવેત્ય ગમનોન્મુખોઽભવત ॥ ૯.૨ ॥

મંદહાસમૃદુસુંદરાનનં વંદનીયમભિવંદ્ય સત્પતિમ ।
પ્રાજ્ઞમૌલિમણિરભ્યનુજ્ઞયા તસ્ય તાવદગમન્મહામતિઃ ॥ ૯.૩ ॥

તસ્ય વલ્લભતમાઽઽસ વાસભૂઃ માનસાત પૃથુલમાનસસ્ય નો ।
નાત્યજત ક્ષણમપિ હ્યસાવિદં નૈષ નાથવિરહી તતોઽભવત ॥ ૯.૪ ॥

વીરદૃષ્ટિકૃતસિંહવિભ્રમઃ શાંતદૃષ્ટિકૃતશાંતસમ્મદઃ ।
તત્રતત્ર પથિ પથ્યવિભ્રમઃ પર્વતાદવતતાર સર્વધીઃ ॥ ૯.૫ ॥

વાનરેંદ્ર ઈવ તીર્ણવારિધિઃ વાસુદેવ ઈવ રત્નરાજવાન ।
ભીમસેન ઈવ સૂનવર્યહૃત્નિર્વૃતિં સ્વજનમાનિનાય સઃ ॥ ૯.૬ ॥

અગ્નિશર્મમુખપંચષૈર્દ્વિજૈઃ અન્નમાહૃતમલં પૃથક સમમ ।
કૃત્સ્નમાદદયમિત્યવિસ્મયઃ કૃત્સ્નમત્તુમલમેષ હિ ક્ષયે ॥ ૯.૭ ॥

વ્યાસદેવહૃદયાતિવલ્લભં વાસુદેવમગણય્યસદ્ગુણમ ।
સાધયત સકલદોષવર્જિતં જ્ઞાનભક્તિદમનંતસૌખ્ય દમ ॥ ૯.૮ ॥

ઉક્તમુક્તમભિધેયમુત્તમં વેદવાક્યમનુવાદયન્મુહુઃ ।
વ્યંજયત સ્મૃતિવચોભિરંજસા તસ્ય ચાર્થમતિયુક્તયુક્તિમત ॥ ૯.૯ ॥

બાલસંઘમપિ બોધયદ ભૃશં દુર્નિરૂપવચનં ચ પંડિતૈઃ ।
અપ્રમેયહૃદયં પ્રસાદવત સૌમ્યકાંતિ ચ વિપક્ષભીષણમ ॥ ૯.૧૦ ॥

અસ્તદૂષણમવંધ્યભાષણં લક્ષિતં સકલલક્ષણૈઃ સમમ ।
માનનીયમપિ નાકિનાયકૈઃ રૂપમન્યદિવ ધન્યમાત્મનઃ ॥ ૯.૧૧ ॥

એકવિંશતિકુભાષ્યદૂષકં બ્રહ્મસૂત્રગણભાષ્યમદ્ભુતમ ।
અપ્યદૂષ્યમતનોદનંતધીઃ ભૂતભાવિભવદાત્મભિઃ કવચિત ॥ ૯.૧૨ ॥

ગાંગમંગલતરંગભંગદપ્રાંતસુશ્રિહરિવેશ્મકૃત્સમઃ ।
યદ્વતૈકતમવર્ણલેખકઃ સત્યતીર્થ ઈહ ભાષ્યમાલિખત ॥ ૯.૧૩ ॥

તત્ર દેવમભિવંદ્ય યાતવાન સ્વામિનો વચનગૌરવાદ દ્રુતમ ।
સાનુગો વિવિધભૂરતીત્ય ગોદાવરીતટમગાદલેશધીઃ ॥ ૯.૧૪ ॥

પ્રાજ્ઞવિત્તમયમાપ્તુમાગતૈઃ પંડિતૈર્દ્વિનવશાખિભિઃ શ્રુતીઃ ।
પ્રસ્તુતા અભિદધૌ પરીક્ષકૈઃ ષટ ચ તત્ર સમયાનખંડયત ॥ ૯.૧૫ ॥

તે પૃથકપૃથગમું સ્વશાખયા દર્શનેન ચ પરીક્ષ્ય નિર્જિતાઃ ।
સર્વવિત ત્વમસિ મુખ્યતઃ કવે નાસ્તિ તે સદૃશ ઈત્યથાબ્રુવન ॥ ૯.૧૬ ॥

યસ્ત્રયીસકલપક્ષશિક્ષકઃ તત્ર સંસદિ વરિષ્ઠસમ્મતઃ ।
શોભનોપપદભટ્ટનામકઃ પૂર્ણસંખ્યમનમન્મુહુર્મુદા ॥ ૯.૧૭ ॥

યસ્તુ તાર્કિકશિખામણિઃ સુધીઃ વર્તમાનસમયાન નિરાકરોત ।
વેદભારતપુરાણનિષ્ઠિતો ભાષ્યમેતદશૃણોત સ મધ્વતઃ ॥ ૯.૧૮ ॥

નાપરેષુ રતિમાયયૌ કવચિદ ભાષ્યમદ્ભુતમિદં સ શુશ્રુવાન ।
નારવિંદમકરંદમાપ્તવાન અચ્છપિચ્ચ ઈવ વાંછતીતરત ॥ ૯.૧૯ ॥

તત્રતત્ર સ સુસભાસુ ભાસુરો નંદિતીર્થસમયોકતયુક્તિભિઃ ।
વાદિનો વિશકલય્ય તાન સમાક્રમ્ય વાચમુચિતામુદાહરત ॥ ૯.૨૦ ॥

ચૂર્ણકૃદ્વિવિધશંખચૂર્ણકઃ ચૂર્ણનાય બહુધાઽપ્યશકનુવન ।
અત્યજદ વિફલધીઃ પ્રદક્ષિણા વર્તવારિજમનર્ઘ મપ્યહો ॥ ૯.૨૧ ॥

અપ્રમેયમતિશાસ્ત્રમીદૃશં યસ્ત્યજત્યુપનતં સુદુર્લભમ ।

તસ્ય તુલ્યમતિરેષ દુર્જનો નાથવાऽસ્ય સદૃશોऽસ્તિ નીચધીઃ ॥ ૯.૨૨ ॥

કોऽપિ તં ગુણવિશેષવિચ્ચ વિક્રીય ભૂરિધનમાપ પૂરુષઃ ।
ન હ્યનર્ઘગુણમૂલ્યમાપ્યતે ભાગ્યદૈવમિહ યોગ્યતાનુગમ ॥ ૯.૨૩ ॥

વ્યક્તમુન્નતિમિતોऽપ્યયં જનઃ તસ્ય યન્ન લભતેખિલં ફલમ ।
સ્તોકમાનસતયા તતો વ્રજેત તસ્ય હંત પુરુષસ્ય તુલ્યતામ ॥ ૯.૨૪ ॥

ક્રીતવાન નરપતિર્મહાદરં સાદરં પુનરુદારચેષ્ટિતઃ ।
અર્ચયન સતતમાપ સંપદો યા ન તા વચનચિત્તગોચરાઃ ॥ ૯.૨૫ ॥

શાસ્ત્રકલ્પકતરોરમુષ્ય કઃ પ્રાપ્નુયાત સકલમપ્યહો ફલમ ।
યસ્તમુત્તમગુણં વિડંબયેદ ઈત્યુદીર્ય સ જનાનરંજયત ॥ ૯.૨૬ ॥

નેદૃશૈઃ કવિભિરેવ કેવલં હંત પૂજ્યચરણોऽભ્યપૂજ્યત ।
શર્વશક્રગુરુપૂર્વદૈવતૈઃ અપ્યલં સુસમયોદ્ગમોત્સવે ॥ ૯.૨૭ ॥

નિમ્નભૂરિવ સતીઃ પ્રજા વ્રજન વારિદર્તુરશનૈરપૂરિ સઃ ।
પ્રાજ્યતાપહરદર્શનાંબુના તુંગદેશમિવ દુર્જનં તુ નો ॥ ૯.૨૮ ॥

કર્મભિઃ સકલલોકકૌતુકૈઃ માનિતઃ પથિ જનૈઃ સમાગતઃ ।
સન્નનામ શિવનામકીર્તનં રાજતાસનપુરે વિરાજિતમ ॥ ૯.૨૯ ॥

અચ્યુતપ્રમતિરચ્યુતપ્રિયં તં દશપ્રમતિમાગતં તદા ।
વંદમાનમવલોક્ય યાં મુદં પ્રાપ્તવાંસ્તદવધિર્ન વિદ્યતે ॥ ૯.૩૦ ॥

પ્રીતિમાર્યયતિરુત્તમાં પુરા પ્રેષિતાપ્રતિમભાષ્યદૃગ યયૌ ।
અપ્યતોઽતિશયિનીં શુચિસ્મિતં તં વિલોક્ય સુચિરાદ દિદૃક્ષિતમ ॥ ૯.૩૧
॥

પૂર્ણદૃષ્ટિજલધેર્ગૃહીતવાન ભાષ્યસંજ્ઞમમૃતં સુખાવહમ ।
ચિત્રમેષ યતિરાડ્ઘનાઘનો ગ્રાહયંશ્ચ મનુજાન મુમોચ નો ॥ ૯.૩૨ ॥

સાનુનીતિરથ નીતિમાનયં ભાષ્યસદ્ગુણગણાનવર્ણયત ।
શોભનાય ગુરવે સ્વભાવતઃ કાલતઃ કુમતલીનબુદ્ધયે ॥ ૯.૩૩ ॥

ઉક્તિભિસ્તમસકૃત સુયુક્તિભિઃ બોધયન બહળધીઃ પ્રસંગતઃ ।
સ્થેયસો ભિષગિવાસ્ય હૃદ્ગતં મૂલદોષમરુચેરચિંતયત ॥ ૯.૩૪ ॥

દક્ષપક્ષવિહતેન તાડયન ભીષયન સમધિકસ્વરશ્રિયા ।
હંસરાટ કલિમલં નિરાકરોદેકદૃષ્ટિમિવ માનસાદ ગુરોઃ ॥ ૯.૩૫ ॥

નિષ્કળંકમિવ ચંદ્રમંડલં પુંડરીકમિવ ફુલ્લતાં ગતમ ।
વારિ શારદમિવ પ્રસાદવત ચિત્તમચ્યુતમતેર્ભૃશં બભૌ ॥ ૯.૩૬ ॥

આનનંદ સ હિ મધ્વશાસ્ત્રમાકર્ણયન કુસમયાગ્રહી પુરા ।

મોહપીતલવણોદકો મુહુઃ પ્રાક પિપાસુરમૃતં પિબન્નિવ ॥ ૯.૩૭ ॥

વિસ્તૃતાંતરવિયત્પદૌ યતી આસ્યતાં સુસમયપ્રકાશનાત ।
તૌ યથા વિધુરવી અહો અહોરાત્રમપ્યુરુતમો નૃમોહકમ ॥ ૯.૩૮ ॥

સજ્જનાન સહ મહાદરેણ નૃન પાપિનાં પ્રકૃતિતોઽપ્રિયાકૃતિ ।
દારુણાઘગણદારણં સ્મ સ ગ્રાહયત્યપિ સુદર્શનદ્રયમ ॥ ૯.૩૯ ॥

નન્વનન્યશરણાત્મનાં સતાં સિદ્ધિવિઘ્નમુખદોષભેષજમ ।
ઐચ્છદચ્ચલદયોદયાદયં રૂપ્યપીઠપુરગઃ કદાચન ॥ ૯.૪૦ ॥

ગોપિકાપ્રણયિનઃ શ્રિયઃપતેઃ આકૃતિં દશમતિઃ શિલામયીમ ।
શિષ્યકૈસ્ત્રિચતુરૈર્જલાશયે શોધયન્નિહ તતો વ્યગાહયત ॥ ૯.૪૧ ॥

સ્પર્શનાદ્ભગવતોઽતિપાવનાત સન્નિધાનપદતાં ગતાં હરેઃ ।
ત્રિંશદુધતનરૈઃ સુદુર્ધરાં લીલયાઽનયદિમામસૌ મઠમ ॥ ૯.૪૨ ॥

મંદહાસમૃદુસુંદરાનનં નંદનંદાનમતીંદ્રિયાકૃતિમ ।
સુંદરં સ ઈહ સન્ન્યધાપયદ વંદ્યમાકૃતિ શુચિપ્રતિષ્ઠયા ॥ ૯.૪૩ ॥

માનિનોઽપિ હિ વશીચકાર યો દૈવતપ્રતિભયાઽઽત્મનઃ ખલઃ ।
યાચજૂકગુણમાત્મનઃ સ્મરન યો જરાઘટિતગોત્ર ઉચ્યતે ॥ ૯.૪૪ ॥

આત્મનઃ પ્રિયતમક્રતોરમું પાપપૂરુષમવેત્ય ઘાતુકમ ।
તં નિરસ્ય જનમપ્યથાહિતં સર્વભૂધરસમર્થપૂર્વકમ ॥ ૯.૪૫ ॥

વિશ્વવિસ્મયકરઃ સ્વતેજસા વંદ્યમાનચરણઃ પુનર્જનૈઃ ।
ચિત્રદિગ્વિજયકીર્ત્યકીર્તિમાન મોદયન્નનુદિનં નિજાઃ પ્રજાઃ ॥ ૯.૪૬ ॥

વાસુદેવદયિતો મહિષ્ઠધીઃ વાસુદેવમથ સાધ્વયાજયત ।
ધર્મસૂનુમિવ ધાર્મિકં પુરા ભીમમૂર્તિરયમેવ ભૂસુરમ ॥ ૯.૪૭ ॥

યાજ્યયા સમુચિતાનુવાક્યયા સપ્રવર્ગ્યવિભવૈરભિષ્ટવૈઃ।
વિશ્વવેત્તુરનુજોઽત્ર હોતૃતાં પ્રાપ્ય દૈવતતતીરતોષયત ॥ ૯.૪૮ ॥

સ પ્રયુજ્ય નિશિતા નિશાતધીઃ વૈશ્વદેવવરશસ્ત્રસંતતીઃ ।
રાક્ષસાસુરનિરાસકૃત સુરાન વીરવર્ય ઈવ ભાગમાપયત ॥ ૯.૪૯ ॥

વાયુના ત્રિરપિ પૂર્વપાયિના સર્વદૈવતજિતા તરસ્વિના ।
યોઽપરોક્ષવપુષાઽપ્યપેક્ષિતઃ કોઽત્ર વર્ણયતિ તં મહાક્રતુમ ॥ ૯.૫૦ ॥

બ્રહ્મવેદનનિવિષ્ટચેતસાં કર્મ તત્ર કરણાંતરં ભવેત ।
જ્ઞાપયન્નિતિ પરાત્મવેદકઃ કર્મ ધર્મમપિ સ હ્યચીકરત ॥ ૯.૫૧ ॥

યાનિયાનિ ચરિતાનિ યાનિયાનીરિતાનિ ચ મનોહરાણ્યહો।
તાનિતાનિ ચ વિતાનિચેતસો વિશ્વવિસ્મયકરાણિ ભાંતિ હિ ॥ ૯.૫૨ ॥

સરસ્વતીર્વૃત્તિકરીઃ શરીરિણાં અતીત્ય બહ્વીઃ સમતીતગોત્રકઃ ।
પુરેવ કૃષ્ણપ્રિયમાપદશ્રમં પૃથુપ્રબોધઃ પુનરુત્તમાશ્રમમ ॥ ૯.૫૩ ॥

સહભોગમનન્યલભ્યમસ્મૈ હનુમદ્રૂપવતે દદૌ પુરા હિ ।
અનવેક્ષ્ય પરં સ્વભીષ્ટકર્ત્રે પ્રતિદાતું હરિરૈધયત તમેવ ॥ ૯.૫૪ ॥

પ્રણમ્ય ગુરુમાદરાદથ નિયોગતો યોગ્યતઃ
સ તસ્ય જગતાં હિતં વિદધતો ગતઃ સાનુગઃ ।
મહિષ્ઠહૃદયો મહામહિમસિંધુરાનંદતો
નિજૈરભિગતોઽનમદ રજતપીઠવાસં હરિમ ॥ ૯.૫૫ ॥

॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
નારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે નવમઃ સર્ગઃ ॥